उपशास्त्री - II   साहित्य - तृतीय - पत्रम्

रघुवंश - महाकाव्यम्

द्वितीय - सर्गः

Date ___/___/_____

प्र०(1) — एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥

ससन्दर्भप्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।
अस्मिन श्लोके सिंहः राजं प्रति कथयति - धेनुसंरक्षणात्मकाय यत्किञ्चित्फलाय अतिदुर्लभानि चक्रवर्ति-त्व राज्य-नवयौवन-सुन्दरशरीर-सुखानि जिहासन् त्वं मया विचारशून्यो दृश्यते ।

व्याख्या:— एकातपत्रं = एकच्छत्रम् अप्रतिद्वन्द्वं वा, जगतः = भूमण्डलस्य, प्रभुत्वं = ऐश्वर्यम्, नवं = नवीनम्, वयः = अवस्थाम्, इदं = पुरो विभाव्यमानम्, कान्तं = मनोहरम्, वपुः = शरीरं च (एतत्सर्वं) बहु = विपुलम्, अल्पस्य हेतोः = अत्यल्पेन कारणेन, हातुं = त्यक्तुम्, इच्छन् = अभिलषयन्, त्वं = भवान् विचारमूढः = विमर्शविकलः, मे = मम, प्रतिभासि = प्रतीयसे

Renu Devi
07/06/21
राधा उमाकान्त सं० महावि० सुरवसेना, पूर्णिया ।

Page No. ____

शास्त्री साहित्यम्
तृतीय-खण्ड: मेघदूतम्
पूर्वमेघ:

(3) तस्य स्थित्वा कथमपि पुर: कौतुकाधानहेतो -
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेत:
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥

प्रसंग → पद्यमिदं महाकवि कालिदासप्रणीतस्य मेघदूताख्यखण्ड-काव्यस्य पूर्वमेघ भागादुद्धृतमस्ति। अत्र कवि: प्रियावियोग-सन्तप्तस्य यक्षस्य वर्णितो मेघावलोकनान्तरं स्वप्रियाजीवन विषये चिन्तनं वर्णयति। मेघसंदर्शनं सर्वेषां जनानां कृते सुखस्थितावापि चित्तविकाराय भवति, का कथा वियोगिन: इत्यभिधाय कवि: यक्षचिन्तां समर्थयति।

व्याख्या — राजराजस्य = धनाधिपस्य कुबेरस्येत्यर्थ:, अनुचर: = अनु = पश्चात् चरतीत्यनुचर: = सेवक:, अन्तर्वाष्प: = निरुद्ध नेत्राम्बु: कौतुकाधानहेतो: = अभिलाषोत्पत्तिनिमित्तस्य, तस्य = मेघस्य, पुर: = समक्षं, कथमपि = केनापि, स्थित्वा = आत्मन: स्थितिं विधाय, चिरम् = बहुकालं यावत्, दध्यौ = स्वप्रियां ध्यातवान्। मेघालोके = मेघावलोकने सति, सुखिनोऽपि = प्रिया-सहितस्यापि, चेत: = मन:, हृदयं, अन्यथावृत्ति = अन्यप्रकारम्, भवति = वर्तते, कण्ठाश्लेषप्रणयिनि = ग्लालिङ्गनाभिलाषिणि, जने = लोके दूरसंस्थे = विप्रकृष्टे सति, किम् पुन: = किम् कथनीयम्।
विरहिणां जनानां कृते मेघदर्शनम भीषट जनस्मरणाय कल्पते इति भाव:। अत्राऽर्थान्तरन्यासालङ्कार:, उत्तरार्धे च कैमुतिकन्यायेन अर्थापतिरलङ्कार:।
मन्दाक्रान्ता वृत्तम्।

Renu Devi
07/05/21
राध्या उमाकान्त सं० महावि० सुखसेना, पूर्णिया

साहित्यम् - तृतीय-पत्रम् - उपशास्त्री - प्रथम-खण्ड
किरातार्जुनीयम् प्रथम सर्ग
परीक्षोपयोगी व्याख्याया:

① गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः कः इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥

प्रसङ्ग:— प्रस्तुतमिदं पद्यम् पण्डित प्रकाण्ड मार्तण्ड महाकवि भारवि विरचितस्य करातार्जुनीयम्-मिति नामकस्य महाकाव्यस्य प्रथम सर्गात् उद्धृतमस्ति ।

व्याख्या:— प्रस्तुत श्लोके युधिष्ठिरं प्रति द्रौपदी उक्ति — अनुरक्तसाधन: = अनुकूल है साधन जिसके (ऐसा) कुलाभिमानी = अपने कुल, वंश की मर्यादा के गौरव का ध्यान रखनेवाला, । त्वदन्य: = तुम्हारे शिवा दूसरा, क इव = कौन सा, नराधिपः = राजा होगा जो, गुणानुरक्तां = सौन्दर्यादि गुणों पर मुग्ध हुई । कुलजां = अच्छे कुल में उत्पन्न, मनोरमां = सुन्दरी, आत्मवधूम इव = अपनी विवाहिता स्त्री जैसी (गुणानुरक्तां = सन्धिविग्रह आदि गुणों से अनुरागवती, कुलजां = वंशपरम्परा से प्राप्त । मनोरमां = मन के अनुकूल) श्रियम् = राजलक्ष्मी को, परैः = दूसरों से, अपहारयेत् = अपहरण करावे ।

भावार्थ:— यस्य सहायका अनुकूलाः स्युः यश्च वंश मर्यादा गौरव-मनुभवेत्, एवं भूतः त्वदितरः क इव राजा स्यात्, यः सौन्दर्यादिगुणैरिव सन्धिविग्रहादिगुणैरनुरागवतीं सत्कुलोत्पन्नामिव वंशक्रमागतां मनोनुकूलां स्वभार्यामिव राजलक्ष्मीं शत्रुभिरन्यैश्च स्वयमेवापहारयोग्यां कारयेत् ।

Renu Devi
07/06/21
राधा उमाकान्त सं० महाविo सुरसेना।
पूर्णिया ।

शेष पृष्ठ →

अभिज्ञानशाकुन्तलम्

प्रकृतेः अष्टौ रूपाण्येण तस्योपास्य देवस्य भगवतः शंकरस्य अष्टौ मूर्तयः सन्ति च। विश्वकल्याणाय तमेव प्रार्थयेत। एनेनावधार्यते यत् कालिदासस्य प्रकृतिप्रेम विलक्षण-चमत्काराध्यायकञ्चास्ति।

Renu Devi
09/06/21
राधाउमाकान्त सं० महा०वि० सुरवसेना पूर्णिया।

शास्त्री - I　　साहित्य

अभिज्ञानशाकुन्तलम्

प्र० (1) - शाकुन्तलमधिकृत्य कालिदासस्य प्रकृति - प्रेमोपवर्णयताम्

उत्तरम् → कालिदासानुसारेण प्रकृतिः मानवजीवनतः सर्वथा भिन्नं वस्तु नास्ति। तन्मते द्वयमपि अन्योऽन्यपूरकं प्रतिभाति अनेकेन महाकविना मानवजीवनः प्रकृतिः प्रकृतौ च मानव जीवनम् अवलोकयत्। शकुन्तला सान्निध्ये स नवमल्लिका सहकारवृक्षं, लासनार्थम् प्रश्यति, स नवमल्लिका सहकारयाः परवधू सम्बन्धम् पश्यति। एतन्मते प्रकृति क्रोडे विहरन्तः मानवाः जीवनस्य पूर्ण प्रमोदमावहन्ति। अप्राकृतिके कृत्रिमे वातावरणे जीवनम् अपूर्णम् नीरसञ्च जायते। प्राकृतावेव वास्तविक सौन्दर्यस्य दर्शनं भवति। शकुन्तलायाः प्रथम साक्षात्कारे एवं राज्ञः दुष्यन्तस्य मुखात् सहसा "शुद्धान्तदुर्लभ" इदमित्यादि पद्यं निःसृतं भवति। स प्रासादस्य कृत्रिम वातावरणापेक्षया वनस्य।

प्राकृतिके वातावरणे सौन्दर्याधिक्यमनुभवति। तस्य विचारे प्रकृति जड़पदार्थः नास्ति। अपितु चेतनवत् व्यवहरन्ती प्रतिभाति यथा चेतन जगतो जननी मिथः प्रेमकरणेन सुखदुःखेषु अन्योऽन्यसाहाय्यं विदधाति तथैव प्रकृतिरपि विदधाति। शकुन्तलायाः प्रस्थानिकावसरे तपोवन तरवः विविध वस्त्राभरणानि प्रदाय कण्व ऋषेः साहाय्यं विदधाति। पवनप्रकम्पितैः पल्लवैः सहकारः शकुन्तलां आह्वानिव आभासते। तपोवन तरवः शकुन्तलापिसर्जने स्वानुमति प्रयच्छन्त इवावलक्ष्यन्ते। कालिदास विश्वसति यत् प्रकृति भाविमंगो सूचयति। मुकुलिता माधवी लता शकुन्तलायाः आसन्न पाणिग्रहणम् सूचयति, तस्योपास्य देवस्य भगवतः शंकरस्य ~~दर्शन~~ सामीप्य स प्रकृतौ करोति।

P.T.O →